पित्तं विषमवेगेन वहति तदा तत्प्रतिकारार्थं भेषजं कुर्य्यात्। असाध्यता न स्यादिति यावत्। अत्र कश्चित्।
स्वस्थानच्यवनं यावद्धमन्या नोपजायते।
तावच्चिकित्स्यासत्त्वेऽपि नासाध्यत्वमिति स्थितिरिति।
तच्च प्रायिकं बहुधा व्यभिचारदर्शनात्। इन्ति च स्थानविच्युतेश्च चकारस्यायोगव्यवच्छेदकत्वमित्यर्थः ॥ * ॥ प्रसङ्गात् कालनिर्णयमाह।
भूलताभुजगाकारा नाड़ी देहस्य संक्रमात्।
विशीर्णा क्षीणतां याति मासान्ते मरणं भवेत् ॥
कदाचित् मञ्जीलतावत् सूक्ष्मा तन्नतिवहति-मत्यल्पवक्रगमना च। कदाचित् सर्पवत् परिपुष्टा तन्नतिवहलवक्रतरवक्रगमना च इति वैशिष्ट्येन सत्यदशातो भेदः। इत्यच कदाचिदलक्ष्यतामतिसूक्ष्मताञ्च यदा गच्छति। देहेऽतिदेहक्रममपेक्ष्य तेन देहोऽपि यदा स्थूलः शोथादिना कदाचिच्च सूक्ष्मः स्यात् तदा द्वितीये मासि म्रियत इति। तथा,—
चञ्चाग्रच्छति वेगेन शान्ततां लभते क्षणात्।
सप्ताहान्मरणं तस्य यद्यङ्गे शोथवर्ज्जितः ॥
क्षणादिति द्रुतं द्रुतं न तु कदाचिदिति। शान्तता-मनुपलभ्यमानत्वम्। शोथेति तत्सम्बन्धे तु नाचिरं मरणाय चिरमेवेत्यर्थः। तथा,—
हिमवद्विशदा नाड़ी ज्वरदाहेन तापिनाम्।
त्रिदोषस्पर्शभजता तदा मृत्युर्दिनत्रयात् ॥
यदा निरन्तरं ज्वरदाहतापौ शैत्यच नाड्याः।
त्रिदोषेति। सन्निपातलक्षणस्य एव भवति ॥
तदा,—
निरीक्ष्या दक्षिणे पादे तदा चैषा विशेषतः।
मुखे नाड़ी वहेन्नित्यं ततस्तु दिनतुर्य्यकम् ॥
गतिस्तु भ्रमरस्येव वहेदेकदिनेन तु।
कन्देन स्पन्दते नित्यं पुनर्लगति चाङ्गुलौ ॥
मध्ये द्वादशयामानां मृत्युर्भवति निश्चितम्।
दक्षिण इति पुंसः। स्त्रियास्तु वाम एव तथेति करस्येव विशेषतो विशेषज्ञानायम्। यदि चोभयनाड्यपि मुखे पुरोभागे नित्यं सदा वहति तदा दिनचतुष्टयं प्राप्य भ्रमरस्य परिभ्रमणरूपं गमनमिव मुख एव यदि वहति तदेकदिनेन। कन्दे मूले स्पन्दनस्थाने कदाचित् न स्पन्दते स्वल्पं स्पन्दत इति सम्भाव्यते। नित्यं प्रायः पुनश्चाङ्गुलौ तन्मूले कदापि लगति तदा तस्मादारभ्य द्वादशप्रहरमध्य एव मृत्युरिति। तथा,—
स्थित्वा नाड़ी मुखे यस्य विद्युद्द्योतिरिवेक्ष्यते।
दिनैकं जीवितं तस्य द्वितीये म्रियते ध्रुवम् ॥
स्थित्वेत्यादिना स्थित्वा स्थित्वा विद्युत्स्फुरणमिव लक्ष्यते द्वितीय इत्यष्टप्रहरादूर्द्ध्वमित्यर्थः। तथा,—
स्वस्थानविच्युता नाड़ी यस्य वहति वा न वा।
ज्वाला च हृदये तीव्रा तदा ज्वालावधिस्थितिः ॥

न वेति स्थित्वा स्थित्वेत्यर्थः। इत्यच यदसाध्यलक्षणमुक्तमवस्थानादपवादविरहे सति तस्यार्द्धप्रवेशो यथायथमार्य्यमतिभिरवगन्तव्य इति नेह प्रतन्यते ग्रन्थगौरवभयात्। मन्दं मन्दमिति अनेन न च भूलतागमनाकारेति विरुध्यते तस्य तात्कालिकमरणविषयत्वात्। सर्व्वमिदं सर्व्वरोग एव वेदितव्यं ज्वरमात्रे तु भ्रम एवेति।”
इति नाड़ीप्रकाशे द्वितीयोद्योतः ॥ * ॥
अथ रोगेषु निरूपणीयेषु प्रधानतया प्रथमं ज्वरनिरूपणमाह। तत्र ज्वरपूर्व्वरूपे।
“अङ्गप्रहेण नाड़ीनां भवन्ति मन्थराः स्रवाः।
स्रवः प्रबलतां याति ज्वरदाहोऽभिभूतये ॥
सान्निपातिकरूपेण भवन्ति सर्व्ववेदनाः ॥
ज्वररूपमाह।
ज्वरकोपे च धमनी सोष्णा वेगवती भवेत्।
उष्णा पित्तादृते नास्ति ज्वरो नास्त्युष्मणा विना ॥
उष्णा वेगधरा नाड़ी ज्वरकोपे प्रजायते ॥
अन्यत्र च।
ज्वरे च वक्रा धावन्ती तथा च मरुतः स्रवे।
रमणान्ते निशि प्रातस्तप्ता दीपशिखा यथा ॥
तत्रापि विशेषमाह।
सौम्या सूक्ष्मा स्थिरा मन्दा नाड़ी सहजवातजा।
स्थूला च कठिना शीघ्रा स्पन्दते तीव्रमारुते ॥
द्रुता च सरला शीघ्रा दीर्घा पित्तज्वरे भवेत्।
शीघ्रमाहननं नाड्याः काठिन्याच्च चला तथा ॥
मलाजीर्णेनातितरां स्पन्दनञ्च प्रकीर्त्तितम्।
नाड़ी तन्तुसमा मन्दा शीतला श्लेष्मदोषजा ॥
द्वन्द्वजमाह।
चञ्चला तरला स्थूला कठिना वातपित्तजा।
ईषच्च दृश्यते तूष्णा मन्दा स्यात् श्लेष्मवातजा ॥
निरन्तरं खरं रूक्षं मन्दश्लेष्मातिवातजम्।
रूक्षवातभवे तस्य नाड़ी स्यात् पित्तसन्निभा ॥
सूक्ष्मा शीता स्थिरा नाड़ी पित्तश्लेष्मसमुद्भवा ॥
प्रसङ्गादाह।
मध्ये करे वहेन्नाड़ी यदि सन्तापिता ध्रुवम्।
तदा नूनं मनुष्यस्य रुधिरापूरिता मलाः ॥
आगन्तुकरूपभेदमाह।

भूतज्वरे सैक इवातिवेगा
धावन्ति नाड्यो हि यथाब्धिगामाः।

तथा,—

ऐकाहिकेन क्वचन प्रदूरे
क्षणान्तगामा विषमज्वरेण।
द्वितीयके वापि तृतीयतुर्य्ये
गच्छन्ति तप्ता भ्रमिवत् क्रमेण ॥

अन्यत्रापि।
उष्णा वेगधरा नाड़ी ज्वरकोपे प्रजायते।
उद्वेगक्रोधकामेषु भयचिन्ताश्रमेषु च ॥
भवेत् क्षीणगतिर्नाड़ी ज्ञातव्या वैद्यसत्तमैः ॥
प्रसङ्गादाह।
व्यायामे भ्रमणे चैव चिन्तायां श्रमशोकतः।
नानाप्रभावगमना शिरा गच्छति विज्वरे ॥

अजीर्णरूपमाह।
अजीर्णे तु भवेन्नाड़ी कठिना परितो जड़ा।
प्रसन्ना च द्रुता शुद्धा त्वरिता च प्रवर्त्तते ॥
तत्र विशेषमाह।
पक्वाजीर्णे पुष्टिहीना मन्दं मन्दं वहेज्जड़ा।
असृक्पूर्णा भवेत् कोष्णा गुर्व्वी सामा गरीयसी ॥
प्रसङ्गाद्भक्षणज्ञानमाह।
पुष्टिस्तैलगुड़ाहारे मांसे च लगुड़ाकृतिः।
क्षीरे च स्तिमिता वेगा मधुरे भेकवद्गतिः ॥
रम्भागुड़वटाहारे रूक्षशुष्कादिभोजने।
वातपित्तानिरूपेण नाड़ी वहति निष्क्रमम् ॥
अथ रसज्ञानम्।
मधुरे वर्हिगमना तिक्ते स्याद्भूलतागतिः।
अम्ले कोष्णा प्लवगतिः कटुके भृङ्गसन्निभा ॥
कषाये कठिना म्लाना लवणे सरला द्रुता।
एवं द्वित्रिचतुर्योगे नानाधर्म्मवती धरा ॥
तथा,—
द्रवेऽतिकठिना नाड़ी कोमला कठिनाशने।
द्रवद्रव्यस्य काठिन्ये कोमला कठिनापि च ॥
चौद्रे पृथग्ग्रन्थिलेव पिष्टे पुष्टेव जायते ॥
अग्निमान्द्यधातुक्षयलक्षणमाह।
मन्दाग्नेः क्षीणधातोश्च नाड़ी मन्दतरा भवेत् ॥
तदुक्तम्।
क्षीणधातौ च मन्दाग्नौ नाड़ी क्षीणतमा ध्रुवम् ॥
तथा,—
मन्देऽग्नौ क्षीणतां याति नाड़ी हंसाकृतिस्तथेति ॥
अन्ये तु।

आमाश्रये पुष्टिविवर्द्धनेन
भवन्ति नाड्योऽग्रभुजाभिदृप्ताः।
आहारमान्द्यादुपवासतो वा
तथैव नाड्यो भुजगायमानाः ॥

प्रसङ्गाद्दीप्ताग्निज्ञानमाह।
लघ्वी भवति दीप्ताग्नेस्तथा वेगवती मता।
प्रसङ्गाद्ग्रहणीमप्याह।
पादे च हंसगमना करे मण्डूकसंप्लवा।
तस्याग्नेर्मन्दता देहे त्वथवा ग्रहणीगदे ॥
तथा,—

भेदेन शान्ता ग्रहणीगदेन
निर्वीर्य्यरूपा त्वतिसारभेदे।
विलम्बिकायां प्लवगा कदाचि-
दामातिसारे पृथुता जड़ा च ॥ * ॥

अथ विसूचिकाज्ञानम्।
निरोधे मूत्रशकृतोर्विड्ग्रहे त्वितराश्रिताः।
विसूचिकाभिभूते च भवन्ति भेकवत् क्रमाः ॥ * ॥
प्रसङ्गादानाहमूत्रकृच्छ्रज्ञानमाह।
आनाहे मूत्रकृच्छ्रे च भवेन्नाड़ी गरिष्ठता ॥ * ॥
शूलज्ञानमाह।

वातेन शूलेन मरुत्प्लवेन
सदैव वक्रा हि शिरा वहन्ती।
ज्वालामयी पित्तविचेष्टितेन
साध्या न शूले न च पुष्टरूपा ॥ * ॥